## झ

झकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुनः स्पर्शः। बाह्यप्रयत्नाः संवारनादघोषमहाप्राणाश्च। मातृकान्यासेऽस्य वामकराङ्गुलीमूले न्यस्यता। अस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा "झकारं परमेशानि! कुण्डलीं मोक्षरूपिणीम्। रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं तथा" वर्णोद्धारतन्त्रे तदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्। रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्। चतुर्द्दशभुजां देवीं रत्नहारोज्ज्वलां पराम्। ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्"। तस्य वाचकशब्दाः वर्णाभिधानतन्त्रे उक्ता यथा "झो झङ्कारी गुहो मार्गी झर्झरो वायुः सस्वनः। अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः। विराजेन्द्रो धनुर्हस्तः कर्कशः नादजः कुब्ज(कुजः)। दीर्घबाहुरसोरूपं ह्याकम्पितकुचञ्चलम्। दुर्मुखो नष्ट आत्मवान् विकटा कुचमण्ड(ञ्ज)लः। कलहंसप्रिया वामा वामाङ्गुलसुपर्वकः। दन्तहासोऽट्टहासश्च पाण्यात्मा व्यञ्जनस्वरः" मात्रावृत्ते तस्य प्रथमविन्यासे फलमुक्तं वृ०र०टी० "प्रीतिं जो मित्रलाभं भयमरणकरौ झञौ ठठौ खेददुःखे"।

**झ** पु० झट–संहतौ ड। १झञ्झावाते २नष्टे ३जलवर्षणे शब्दर० ४भिरण्टीशे ५देवगुरौ ६दैत्यराजे ७ध्वनिभेदे ८उच्चवाते च मेदि०। [परमेशानि!" कामधेनुत०।

**झकार** पु० झ+स्वार्थे कारप्रत्ययः। झस्वरूपे वर्णे "झकारं

**झगझगायमान** त्रि० झगझग+अभूततद्भावे भृशा० क्यङ् शानच्। देदीप्यमाने। "मयूरवरगामिनीं सुरदशुद्धवर्णोत्कटां रणत्क्वणितघण्टिकां निशितशक्तिहस्तोद्यताम्। प्रभानिकररश्मिभिर्झगझगायमानांशुकां नमामि गुहसम्भवां त्रिदशशत्रुनिर्णाशिनीम्" देवी० पु०।

**झगति** अव्य० झटिति+पृषो०। शीघ्रार्थे शब्दार्थचि०।

**झङ्कार** पु० झमित्यव्यक्तशब्दस्य कारः कृ–घञ्। १भ्रमरादिशब्दे। "मन्दं मुद्रितपांशुलः परिपतन् झङ्कारझञ्झामरुत्" अमरुश०। ततः तार० इतच्। झङ्कारित तच्छब्दयुक्ते त्रि०। २जलकणवर्षणे च शब्दर०।

**झङ्कारिणी** स्त्री ६त०। गङ्गायां भिरण्टीशशब्दे उदा०।

**झङ्कृता** स्त्री तारादेवतायां "झर्झरी झङ्कृता झिल्ली झरी झर्झरिका तथा" तारासहस्रनाम।

**झङ्कृति** स्त्री झम् इत्यव्यक्तशब्दस्य कृतिः कृ–क्तिन्। कांस्यादेर्ध्वनौ शब्दार्थचि०।

**झञ्झा** स्त्री झमिति कृत्वा झटति झट–ड। १ध्वनिभेदे, तथाध्वनियुक्ते २प्रचण्डानिले च शब्दर०।

**झञ्झानिल** पु० झञ्झायुक्तोऽनिलः। प्रावृषिजातवाते त्रिका० झञ्झामरुदादयोऽप्यत्र झङ्कारशब्दे उदा०।

**झट** संहतौ भ्वा० पर० अक० सेट्। झटति अझाटीत्–अझटीत्। जझाट।

**झटा** स्त्री झट–अच्। १शीघ्रे। २भूम्यामलक्यां शब्दार्थचि०

**झटि** पु० झट–इन्। क्षुद्रतृणभेदे। (झाँटि) शब्दार्थर०।

**झटिति** अव्य० झट क्विप् झट् इण–क्तिन् ६त० स्वरादि। १शीघ्रे अमरः। "त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम" पदाङ्कदूतम्।

"झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते" "मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्" सा० द०।

**झड्क** पुंस्त्री अन्त्यजवर्णभेदे "प्रपाखरण्ये झड्कस्य कूपे द्रोण्यां जलं कोशविनिर्गतञ्च" अत्रिसं०।

**झणझणा** अव्य० झणत् डाच् द्वित्वं पूर्वपदटिलोपः। १अव्यक्तशब्दभेदे २तच्छब्दयुक्ते "सर्वं झणझणाभूतमासीत्तालवनेष्विव" भा० भी० १६अ०। ३झणत्कारशब्दभेदे च।

**झण(न)त्कार** पु० झन(ण)दित्यव्यक्तशब्दस्य कारः कृ–घञ्। कङ्कणादिध्वनौ। "उद्वेल्लद्भुजवल्लिकङ्कणझण(न)त्कारः क्षणं वार्य्यताम्" कालिदासः। "उद्वेजयति दरिद्रं परमुद्रागणनझणत्कारः" उद्भटः।

**झम** भक्षे भ्वा० पर० सक० सेट्। झमति अझमीत्। जझाम। उदित् झमित्वा-झान्त्वा। झान्तः।

**झम्प** पु० लम्फ+पृषो०। (झाँपदिया पड़ा) लम्फे स्वेच्छाधीने संपातपतने जटाधरः। भावे अ। तत्रार्थे स्त्री "पुच्छास्फोटदलत्ससुद्रविवरैः पातालझम्फाश्च ताः" महावीर०

**झम्पाक** पुंस्त्री झम्पेन आकायति आ+कै+क। १वानरे शब्दच०। स्त्रियां जातित्वात् ङीष्।

**झम्पाशिन्** पु० झम्पेन जले स्वेच्छया पतनेनाश्नाति अश–णिनि। मत्स्यरङ्गपक्षिणि जटाधरः स्त्रियां ङीप्।